स्तनौ" "अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः" इति च रघुः। "अङ्गुलिप्रकुङ्कुमे२" च। क्षिपकादित्वात् कापि नेत्त्वम्। अलका। अष्टवर्षावधिद्वादशवर्षपर्य्यन्तवयस्कायां ३कन्यायां ४कुवेरपर्य्याञ्च स्त्री। साच पुरी मेरुशिखरोपरिस्थेति अग्निलोकशब्दे दर्शितम्। तस्याः स्वरूपमुम् "सभा वैश्रवणी राजन्! शतयोजनमायता। विस्तीर्णा सप्ततिश्चैव योजनानि सितप्रभा। तपसा निर्ज्जिता राजन्! स्वयं वैश्रवणेन सा। शशिप्रभा प्रावरणा कैलासशिखरोपमा। गुह्यकैरुह्यमाना सा खे विषक्तेव शोभते। दिव्या हेममयैरुच्चैः प्रासादैरुपशोभिता। महारत्नवती चित्रा दिव्यगन्धा मनोरमा। सिताभ्रशिखराकारा प्लवमानेव दृश्यते। दिव्या हेममयैरङ्गैर्विद्युद्भिरिव चित्रिता। तस्यां वैश्रवणो राजा विचित्राभरणाम्बरः। स्त्रीसहस्रैर्वृतः श्रीमनास्ते ज्वलितकुण्डलः। दिवाकरनिभे पुण्ये दिव्यास्तरणसंवृते। दिव्यपादोपधाने च निषण्णः परमासने। मन्दाराणा मुदाराणां वनानि परिलोड़यन्। सौगन्धिकवनानाञ्च गन्धं गन्धवहो वहन्। नलिन्या श्चालकाख्याया नन्दनस्य वनस्य च। शीतो हृदयसंह्लादी वायुस्तमुपसेवते" भा०स०प०। गन्धवतीं नाम वायुपुरीं वर्णयित्वा काशी० ख० "ततःपरं कुवेरस्य श्रीमत्येषालका पुरील्युक्तम्। "अलकामतिवाह्यैव" कुमा०।

**अलकनन्दा** स्त्री अलति पर्य्याप्नोति कुन् अलका नन्दयतीति अच् नन्दा कर्म्म०। १गङ्गायाम्। "विष्णुपदी विष्णुपदात् पतिता मेरौ चतुर्द्धाऽस्मात्। विष्कम्भाचलमस्तसरःसङ्गता गता वियता। सीताख्या भद्राश्वं सालकनन्दा च भारतं वर्षम्" सि०शि०। "तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटानि अतिक्रम्य हेमकूटहिमकूटान्यतिरभसरंहसा लुठन्ती भारतमभि वर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति" भा०५स्क०। अलकैर्नन्दति अच्। २कन्यायाम्। सा हि अलकैस्तुष्यति।

**अलकप्रभा** स्त्री अलका पर्य्याप्ता प्रभा यस्याः। कुवेरपुर्य्यामलकाख्यायाम्। [(पियासाल) पीतसालवृक्षे।

**अलकप्रिय** पु० अलकान् प्रीणाति चिक्कणीकरोति प्री—क।

**अलकाधिप** पु० अलकाया अधिपः ६त०। कुवेरे। अलकेश्वरादयोऽप्यत्र। "अत्यजीवदमरालकेश्वरौ" रघुः।

**अलक्त** पु० न रक्तोऽस्मात् ५ब० रस्य लत्वम्। १लाक्षारसे, स्वार्थे कन्। अलक्तकोऽप्यत्र २तद्वति लाक्षायाञ्च। "अलक्तकाङ्कां पदवीं ततान" कुमा०रघुश्च। "चिरोज्झितालक्तकपाटलेन" कुमा०गोरचनालक्तककुङ्कुमेनेति" तन्त्रम्।

**अलक्षण** न० लक्षणमनुमापकं सुचिह्नं न०त०। १अननुमापके, सुचिह्नभिन्ने २दुर्लक्षणे च। लक्षणञ्च इतरभेदानुमापकं लिङ्गम् यथा पृथिव्यागन्धवत्त्वम् जलस्य स्नेहवत्त्वम्। शुभसूचकं चिह्नविशेषश्च लक्षणं तच्च लक्षणशब्दे वक्ष्यते। तदुभयभिन्नमलक्षणम् "आचाराद्धनमक्षय्यमाचारोहन्त्यलक्षणम्" मनुः। नास्ति लक्षणं अनुमापकोऽव्यभिचारिहेतुः अशुभसूचकहेतुश्च यस्य।२तद्वति त्रि० "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्" मनुः। "क्लेशावहा भर्त्तुरलक्षणाहम्" रघुः। "अलक्षणा भवन्ति यद्वै नास्ति तदलक्षणमसत्तम्" शत० ब्रा०। "निर्ऋतीः कृष्णास्तुषपक्कास्तिस्रोऽलक्षणाः" कात्या० १७,२४,२३।

**अलक्षित** त्रि० लक्ष—क्त न०त०। १अज्ञाते २लक्षणेनाननुमिते "अलक्षिताभ्युत्पतनो नृपेण" रघुः "वपुर्विरूपाक्षमलक्षिता जनिः" काव्य०प्र०। ३अकृतचिह्ने च। "दक्षिणेन द्वारं सोमक्रयणी तिष्ठत्यलक्षिता व्यङ्गा" कात्या०। ७,६,१४, "अलक्षिता अनङ्किता" कर्क०।

**अलक्ष्मी** स्त्री विरोधार्थे नञ्त०। लक्ष्मीविरुद्धायां निर्ऋतौ "आलक्ष्मीति" ख्यातायाम्। "अलक्ष्मीः कालकर्णी च" पुरा०। "अलक्ष्मीरपक्रामति" सुश्रुतः।

**अलक्ष्य** त्रि० न लक्ष्यते लक्ष—कर्म्मणि यत् न०त०। १अज्ञेये २दुर्ज्ञेये। "वपुर्विरूपाक्षमलक्ष्यजन्मता" कुमा०। न लक्ष्या लक्षणया बोध्या। ३लक्षणाबोध्यभिन्ने "न वाच्यत्वादिकं तस्य" इत्यस्य व्याख्याने 'आदिशब्दादलक्ष्यत्वादि' सा०द०। नास्ति लक्ष्यं व्याजोयस्य। ४व्याजशून्ये त्रि०।

**अलगर्द्द** पु० लगति स्पृशति क्विप् लग् अर्द्दयति अर्द्द—अच् अल् स्पृशन् सन् अर्द्दो न भवति। १विषशून्ये जलव्याले पृषो० धत्वम् अलः पर्य्याप्तो गृध्नोति वा गृध—अच् वा। अलगर्द्धोऽप्यत्र। दर्वीकरगणनायां सुश्रुतः "महाशिरा अलगर्द्द आशीविष" इति। २जलायुकाभेदे स्त्री। "अथ जलायुका वक्ष्यन्ते। जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः। ता द्वादश तासां सविषाः षट् तावत्य एव निर्विषाः। तत्र सविषाः कृष्णा कर्व्वुरा अलगर्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति। "रोमशा महापार्श्वा कृष्णमुख्यलगर्द्दा" इति च सुश्रु०।

**अलग्न** त्रि०न लग्नः संसृष्टः। लग्नभिन्ने असंसृष्टे "अलग्नमिव ह वै वागवदेद्यन्मनो न स्यात्" शत०ब्रा० "अलग्नमिव वक्तव्यपदार्थेन सहासंसृष्टम्" भा०। अलग्लमित्यपाठः।